दीपकः, पुं, ( दीपयति जठराग्निमिति । दीपि+ ण्वुल् । ) यमानी । इति रत्नमाला ॥ (गुणाश्चास्य यमानीशब्दे ज्ञेयाः ॥ ) लोचमस्तकः । इति शब्दरत्नावली ॥ दीपः । ( यथा, ब्रह्माण्ड-पुराणे ।
"विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः ॥")
येन पक्षिणान्ये पक्षिणो गृह्यन्ते सः । इति हेमचन्द्रः । ४ । ४०८ ॥ बाज् इति शिकरा इति च भाषा । रागविशेषः । अयं हनूमन्मते षड्रागेषु द्वितीयरागः । सूर्य्यनेत्राग्निर्गतः । अस्य जातिः सम्पूर्णा । ग्रहन्तु षड्जस्वरः । गानसमयस्तु ग्रीष्मर्त्तौ मध्याह्नः । अस्य रूपं यथा । वर्णो रक्तः । वस्त्रं पाटलवर्णम् । गलभूषणं हृहन्मुक्तामाल्यम् । मत्तहस्त्यारूढ़ोऽयम् । बहुस्त्रीपरिवृतश्च । कस्यचिन्मते । लज्जया दीपनिर्व्वापणेनान्धकारमयं गृहं कृत्वा स्त्रीभी रमते । अस्य रागिण्यः पञ्च यथा । देशी १ कामोद् २ नट् ३ केदारा ४ कानरा वा कर्णाटी ५ । पुत्राश्चाष्टौ यथा । कुन्तलः १ कमलः २ कलिङ्गः वा कलिन्द्रः ३ चम्पकः ४ कुसुम्भः वा कुसुमः ५ रामः ६ लहिलः ७ हिमालः ८ । भरतमते अस्य रागिण्यो यथा । केदारा १ गौरा २ गौड ३ गुज्जरी ४ रुद्राणी ५ । तन्मते पुत्रा यथा । कुसुमः १ टङ्कः २ नटनारायणः ३ विहागरा: ४ किरोदस्तः ५ रहसमङ्गला वा रभसमङ्गला ६ मङ्गलाष्टकः ७ अड़ानुः वा आड़ाना ८ । इति तहफतोलहिन्दाख्यसंगीतशास्त्रसंग्रहः ॥ ( तालविशेषः । यथा, सङ्गीतदामोदरे ।
"द्रुतौ लघुः द्रुतश्चैव ताले दीपकनामनि ॥")

दीपकिट्टं, क्ली, ( दीपस्य किट्टम् । ) दीपजातकज्जलम् । इति शब्दार्थकल्पतरुः ॥

दीपकूपी, स्त्री, ( दीपस्य कूपीव तैलधारकत्वात् ।) दीपवर्त्तिः । शलिता इति भाषा । तत्पर्य्यायः । तैलमाली २ दीपखोरी ३ विदाहिका ४ । इति शब्दमाला ॥

दीपखोरी, स्त्री, ( दीपं खोरयति गत्याघातं करोति स्थिरीकरोतीति । खोर् गत्याघाते+ णिच्+अच् । गौरादित्वादित् ङीष् । ) दीपकूपी । इति शब्दमाला ॥

दीपध्वजः, पुं क्ली, ( दीपस्य ध्वज इव । ) कज्जलम् । इति जटाधरः ॥

दीपनं, क्ली, ( दीपयति वह्निमिति । दीप+णिच् +ल्युः । ) तगरमूलम् । इति रत्नमाला ॥ कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ (मन्त्रसंस्कारविशेषः । यथा, शारदातिलके ।
"मन्त्राणां दश कथ्यन्ते संस्कारा सिद्धिदायिनः ।
जननं जीवनं पश्चात्ताड़नं बोधनं तथा ॥
अथाभिषेको विमलीकरणाप्यायने तथा ।
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंक्रियाः ॥"
"तारमायारमायोगो मनोर्दीपनमुच्यते ॥" )

दीपनः, पुं, ( दीप्यते इति । दीप+ल्युः । ) मयूरशिखा । (दीप+णिच्+ल्युः ।) शालिञ्चशाकः । इति शब्दचन्द्रिका ॥ कासमर्द्दः । पलाण्डुः । इति राजनिर्घण्टः ॥ दीपयितरि, त्रि ॥ (यथा, ऋतुसंहारे । १ । ३ ।
"सुवासितं हर्म्यतलं मनोरमं
प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥")

दीपनी, स्त्री, ( दीप्यते जठरवह्निरनया । दीप+ णिच्+ल्युट् । स्त्रियां ङीप् । ) मेथिका । (अस्याः पर्य्याया यथा,—
"मेथिका मिथिनी मेथिर्दीपनी बहुपत्रिका ।
बोधिनी गन्धबीजा च ज्योतिर्गन्धफला तथा ॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पीतबीजा मुनिच्छदा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पाठा । यवानी । इति राजनिर्घण्टः ॥

दीपनीयः, पुं, (दीप्यते जठरवह्निरनेनेति । दीप+ णिच्+अनीयर् । ) यवानी । इति राजनिर्घण्टः ॥ दीपनयोग्ये, त्रि । (यथा सुश्रुते । १ । ४५ ।
"दीपनीयमचक्षुष्यं वाड़वं दधि वातलम् ॥")
औषधवर्गविशेषः । यथा,—
"पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
दीपनीयः स्मृतो वर्गः कफानिलगदापहः ॥"
इति चक्रदत्तः ॥

दीपपादपः, पुं, ( दीपस्य पादप इव । ) दीपवृक्षः । इति शब्दार्थकल्पतरुः ॥

दीपपुष्पः, पुं, ( दीप इव पुष्पं यस्य । ) चम्पकवृक्षः । इति राजनिर्घण्टः ॥

दीपवती, स्त्री, ( दीपवत् तेजस्वित्वं अस्त्यस्या इति । दीप+मतुप् । मस्य वः । ) कामाख्यायां नदीविशेषः । यथा,—
और्व्व उवाच ।
"शाश्वती कथिता या तु नदी मत्स्यध्वजा सिता ।
तस्याः पूर्व्वे समाख्याता नदी दीपवती मता ॥
एवा च हिमवज्जाता छिन्दन्ती दीपवत्तमः ।
तेन देवमनुष्येषु नदी दीपवती स्मृता ॥
दीपवत्याः पूर्व्वतस्तु शृङ्गाटो नाम पर्व्वतः ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

दीपवृक्षः, पुं, (दीपस्य वृक्ष इव आधारः ।) दीपाधारः । पिलसुज् इति देलुका इति च भाषा । तत्पर्य्यायः । दीपतरुः २ ज्योतृक्षावृक्षः ३ । इति त्रिकाण्डशेषः ॥ दीपपादपः ४ । इति शब्दार्थकल्पतरुः ॥ ( यथा, महाभारते ।१२।२०२।८।
"यथा प्रदीप्तः पुरतः प्रदीपः
प्रकाशमन्यस्य करोति दीप्यन् ।
तथेह पञ्चेन्द्रियदीपवृक्षा
ज्ञानप्रदीप्ताः परवन्त एव ॥")

दीपशिखा, स्त्री, ( दीपस्य शिखा कारणत्वेन अस्त्यस्याः । अच् । टाप् । ) कज्जलम् । इति शब्दार्थकल्पतरुः ॥ (दीपस्य शिखा ।) प्रदीपज्वाला ॥ ( यथा, रघुः । ६ । ६७ ।
"सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ॥")

दीपशृङ्खला, स्त्री, (दीपानां शृङ्खलेव ।) दीपाली । इति हारावली । १२४ ।

दीपान्विता, स्त्री, ( दीपैरन्विता युक्ता । ) गौणचान्द्रकार्त्तिकस्यामावास्या । यथा, भविष्यपुराणम् ।
"येयं दीपान्विता राजन् ! ख्याता पञ्चदशी भुवि ।
तस्यां दद्यान्न चेद्दत्तं पितृणां वै महालये ॥
पञ्चदशी अमावास्या । अमावास्यामधिकृत्य ।
दीपमालाश्च कर्त्तव्याः शक्त्या देवगृहेषु च ।
रथ्यापणश्मशानेषु नदीपर्व्वतसानुषु ॥
इति ब्रह्मपुराणोक्तनानास्थानदीपदानेन दीपान्विता ख्याता येयमिति विशेषणाच्च ।" इति श्राद्धतत्त्वम् ॥*॥ तत्र कर्म्माणि यथा,—
"प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् ।
दीपवृक्षास्तथा कार्य्या भक्त्या देवगृहेष्वपि ॥
चतुष्पथे श्मशानेषु नदीपर्व्वतसानुषु ।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च ॥
वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः ।
दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम् ॥
ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षितान् ।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना ॥
स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्भृत्यकैः सह ॥"
इति तिथितत्त्वम् ॥

तत्र श्यामापूजाप्रमाणं यथा,—
"दीपान्विता पार्व्वणाय स्मृता काल्यर्च्चनाय च
महानिशि द्वितीयं स्यात् पूर्व्वैद्युर्व्याप्तिनाप्तयोः
महानिशि व्याप्त्यनाप्तयोः पूर्व्वेद्युरेव द्वितीय काल्यर्च्चनं स्यात् इत्यर्थः । प्रथमं पार्व्वणं द्वितीय काल्यर्च्चनमिति द्वितीयशब्दस्य तात्पर्य्यार्थः ।"
इति स्मृतिसारसंग्रहधृतयोमकेशतन्त्रम् ॥*॥
अपरञ्च ।
"दीपोत्सर्गचतुर्द्दश्या संमिश्रा या भवेत् कुहूः ।
तस्यां या तामसी रात्रिः सोच्यते कालरात्रिका ॥
तस्यां पूजा प्रकर्त्तव्या काली तारा प्रियङ्करी ॥"
इति कालीकुलसद्भावः ॥

दीपाली, स्त्री, ( दीपानां आली श्रेणी । ) दीपमाला । तत्पर्य्यायः । दीपशृङ्खला २ । इति हारावली । १२४ ॥ (दीपानां आली यत्र । ) दीपान्वितामावास्या । तत्पर्य्यायः । यक्षरात्रिः २ । इति त्रिकाण्डशेषः ॥

दीपिका, स्त्री, ( दीपयति प्रकाशयति गृहादीनिति । दीप+णिच्+ण्वुल् । टापि अत इत्वम् । ) महिन्तापनीयश्रीनिवासकृतज्योतिर्ग्रन्थविशेषः । यथा, अस्तं गतवति मिहिरेऽतिमलिनदोषाकुले च गोविभवे । उद्वाहादिषु शुद्धिग्रहणार्थं दीपिका क्रियते ॥ एतद्भिन्ना भुवनचण्डजातकमुद्रादिदीपिकाः सन्ति ॥ रागिणी-